PGZCFX

# 11. शृंङ्गिऋषेः नगरी

छत्तीसगढराजस्य पूर्वदिशि धमतरीजिलान्तर्गतं सिहावानगरी विद्यते । पर्वतस्य सघनगुहाभिः विविधैः मठैः च आच्छादिता इयं नगरी प्रसिद्धा । पर्वतस्योपरिभागे शृंङ्गिऋषेः आश्रमः अस्ति । शृंङ्गिऋषेः धर्मपत्नी शान्तादेवी अपि अस्मिन् पर्वते विराजते ।

पर्वतस्य गुहायां शक्तिस्वरूपिणी दुर्गा प्रतिष्ठिता । अस्य क्षेत्रस्य इयं सिहावानगरी प्रयागः इति अभिधीयते। सिहावाक्षेत्रस्य समीपे सांकरा नाम ग्रामः अस्ति । यत्र दन्तेश्वरीमाता बस्तरराज्ञः कुलदेवी इति ख्यातिं प्राप्ता । नगरवासिनः देवीं दन्तेश्वरीं शक्तिस्वरूपां मन्यन्ते । अत्रैव शक्तिस्वरूपा सतीमाई गादीमाई च विराजेते। ग्रामदेवता ठाकुरदेवः अपि जनैः पूज्यते । सघनवनानां मध्ये प्रतिष्ठिता देवीकालिका खल्लारीग्रामान्तर्गतं विद्यते । अत्र आगन्तुकाः श्रद्धालुजनाः स्वकामनाप्राप्त्यर्थं देवीं प्रार्थयन्ते । देवीकालिका तेषाम् आकांक्षाः पूरयति ।

देवीकालिका न केवलं छत्तीसगढ राज्ये प्रत्युत सर्वत्र प्रसिद्धा । अत्र कर्णेश्वरधाम - स्वविपुलसांस्कृतिक-सम्पदाभिः परिपूर्णम् अस्ति । भौगोलिक-प्राकृतिक-आदिम-संस्कृति-पुरातात्विक-सम्पदानां निधिः सप्तऋषीनां स्थली च इयं सिहावानगरी छत्तीसगढराज्ये अतिप्रसिद्धा ।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| पर्वतस्य | - | पर्वत का | प्राप्त्यर्थम् | - | प्राप्ति के लिये |
| उपरिभागे | - | उपर भाग में | प्रार्थयन्ते | - | प्रार्थना करते हैं |
| विराजते | - | विद्यमान है | नगरवासिनः | - | नगरवासी लोग |
| अभिधीयते | - | कहते हैं | सम्पदानां निधि | - | सम्पदाओं का भण्डार |
| मन्यन्ते | - | मानते हैं | | | |

## अभ्यासः

**1. निम्नांकित प्रश्नों के उत्तर संस्कृत में दीजिए ।**

1. शक्तिस्वरूपा दुर्गा कुत्र प्रतिष्ठिता ?
2. सिहावाक्षेत्रं किम् अभिधीयते ?
3. सघनवनानां मध्ये खल्लारीग्रामान्तर्गतं का देवी विद्यते ?
4. सप्तऋषीनां तपस्थली का अस्ति ?

**2. रिक्त स्थानों की पूर्ति कीजिए ।**

1. सिहावाक्षेत्रस्य समीपे ............... ग्रामः अस्ति ।
2. पर्वतस्य गुहायां ............... प्रतिष्ठिता ।
3. बस्तरराज्ञः ................ इति ख्याति प्राप्ता ।
4. .................... केवलं छत्तीसगढराज्ये न ख्याता प्रत्युत विश्वप्रसिद्धा ।

PH98HK

**3. अस् धातु के लट्, लृट और लङ् लकार के सभी रूप लिखिये ।**